**Army Children's Academy**

**Subject-Sanskrit**

**Class-8th**

**निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर ढूंढकर अपनी उत्तरपुस्तिका में लिखे।**

**(क)**

## अपठित-गद्यांशः

हिमालयो नाम पर्वतः भारतदेशस्य उत्तरस्यां दिशि वर्तते। अस्य शिखरभागाः सदैव हिमाच्छादिताः सन्ति। अतएव सः हिमस्य आलयः अर्थात् 'हिमालयः' कथ्यते। सः विश्वस्य समस्तेषु पर्वतेषु उन्नततमः। अत एव सः 'नगाधिराजः' इत्यपि ज्ञायते। पर्वतोऽयं भगवतः शिवस्य 'क्रीडास्थली, भगवत्याः पार्वत्याः उत्पत्तिस्थलमपि, विविधकिन्नर-गन्धर्व-साधु-सुरादीनां वसतिरपि।

**प्रश्नाः –**

१. उपर्युक्तगद्यांशस्य उचितं शीर्षकं लिखत ?

२. हिमालयः भारतस्य कस्यां दिशि वर्तते ?

३. हिमालयः कस्य क्रीडास्थली अस्ति ?

४. कः विश्वस्य समस्तेषु पर्वतेषु उन्नततमः?

५. 'नगाधिराजः' कस्य अपर नाम ?

६. हिमालयः पदस्य समासविग्रहः कः अस्ति ?

(ख)

विद्या सर्वेषां श्रेष्ठं धनमस्ति। तेन एव मनुष्यो भवति अन्यथा विद्यारहितो पशुः अस्ति। इदं धनं चौराश्चोरयितुं बान्धवाश्च विभाजयितुं न शक्नुवन्ति। व्यये कृते इदं धनं सर्वदा वर्धते। विदेशगमने विद्या परमसहायिका भवति।

**प्रश्नाः** –

१. उपर्युक्तगद्यांशस्य उचितं शीर्षकं लिखत ?

२. किं धनम् श्रेष्ठम् अस्ति ?

३. व्यये कृते किं वर्धते ?

४. विद्या कुत्र परमसहायिका भवति ?

५. कां चौराश्चोरयितुं न शक्नुवन्ति ?

(ग)

कस्मिंश्चिन्नगरे एकं महत् मन्दिरमासीत्। तत्र एको महात्मा निवसति स्म। स सदा वेदशास्त्राभ्यासम् अकरोत्। लोकानां कल्याणाय शास्त्रकथाश्चाश्रावयत्। तत्र अनेके महिलापुरुषाः कथां श्रोतुं सङ्घीभूय प्रतिदिनं प्रयान्ति स्म। देवप्रतिमां च पूजयन्ति स्म।

**प्रश्नाः** –

१. उपर्यक्तगद्यांशस्य उचितं शीर्षकं लिखत?

२. मन्दिरं कुत्र आसीत् ?

३. मन्दिरे कः निवसति स्म ?

४. महात्मा सदा किं अकरोत् ?

५. महिलापुरुषाः प्रतिदिनं किमर्थं प्रयान्ति स्म ?

६. निवसति पदे उपसर्ग-धातु-लकार-पुरुष-वचनं किम् अस्ति ?

**(घ)**

भारतीयधर्मस्य मूलाधारः अहिंसा एव अस्ति। गीतायां श्रीकृष्णेन देवी-सम्पत्सु अहिंसायाः गणना प्रथमे स्थाने कृता। बौद्धधर्मः, जैनधर्मः च उभौ अहिंसाप्रधानौ एव। महात्मागाँधी अपि अहिंसायाः पालने बलं दत्तवान्। तस्य अयं विश्वासः आसीत् यद् अहिंसकस्य सम्मुखे हिंसकः अपि स्वस्य हिंसावृत्तिं परित्यजति।

**प्रश्नाः** –

१. उपर्युक्तगद्यांशस्य उचित-शीर्षकं लिखत ?

२. कस्य मूलाधारः अहिंसा भवति ?

३. कौ अहिंसाप्रधानौ धर्मौ स्तः ?

४. अहिंसा मार्गः केन महापुरुषेण स्वीकृतः ?

५. कुत्र अहिंसायाः गणना प्रथमे स्थाने कृता ?

**निम्नलिखित निबंधों को कंठस्थ कर उत्तरपुस्तिका में लिखे।**

## निबन्धः

### भारतदेशः

भारतवर्षः अस्माकं देशः अस्ति। अयं अस्माकं जन्मभूमिः। अस्य भूमिः विविध-रत्नानां जननी अस्ति। अस्य प्राकृतिकी शोभा अनुपमा अस्ति। हिमालयः अस्य प्रहरी अस्ति। एषः उत्तरे मुकुटमणिः इव शोभते। सागरः अस्य चरणौ प्रक्षालयति। भारतवर्षः अखिलविश्वस्य गुरुरस्ति। अनेकाः पवित्रतमाः नद्यः अत्र वहन्ति। गङ्गा, गोदावरी, सरस्वती, यमुना प्रभृत्यः नद्यः अस्य शोभां वर्धयन्ति। अयं देशः सर्वासां विद्यानां केन्द्रम् अस्ति। अयम् अनेकप्रदेशेषु विभक्तः। अत्र विविधधर्मावलम्बिनः सम्प्रदायिनः जनाः निवसन्ति। अस्य संस्कृतिः धर्मपरम्परा च श्रेष्ठा अस्ति। इयं भूः स्वर्गः अपि वर्तते। ईश्वरस्य अवताराः अस्मिन् देशे सञ्जाताः। वयं स्वदेशोपरि गर्वान्विताः स्मः।

### परोपकारः

परेषाम् उपकारः परोपकारः कथ्यते। यत्कार्यं निःस्वार्थभावनाया क्रियते तदैव परोपकारः। संसारे द्विविधा मनुष्याः सन्ति। तेषु केचन् सज्जनाः भवन्ति। तेषां सम्पूर्ण-जीवनं परहितार्थं समर्पितं भवति। वृक्षाः परहिताय स्वफलानि छायां च यच्छन्ति। नद्यः परेषां पिपासां शान्तयितुं अनवरतं प्रवहन्ति। मेघाः जलं वर्षित्वा संसारं हरितं कुर्वन्ति। प्रकृतिः निरन्तरं परकल्याणरता वर्तते। परम् इयं कदापि प्रत्युपकारं न वाञ्छति। प्रकृतेः सदृशः परोपकारिणः स्वशरीरम् अपि परोपकारायैव मन्यते। अस्माकं देशे दधीचिः, शिविः इत्यादयः अनेके महापुरुषाः स्वशरीरं दत्वा अपि परोपकारं अकुर्वन्। अतः वयमपि परोपकारिणः

## अनुशासनम्

समाजे नियमानां पालनम् अनुशासनं भवति। जीवने अनुशासनस्य विशेषं महत्त्वं भवति। प्रत्येकस्मिन् पदे अनुशासनम् आवश्यकं भवति। अनुशासनं विना किमपि कार्यं सफलं न भवति। छात्रेभ्य: अनुशासनं व्यवस्थायै परमावश्यकम् अस्ति। अनुशासित: सर्वेभ्य: प्रिय: भवति। सामाजिकव्यवस्थायै अनुशासनम् अत्यन्तम् आवश्यकम् अस्ति। यस्मिन् समाजे अनुशासनं न भवति तत्र सदैव कलह: भवति। शिक्षकस्य अनुशासने छात्रा: निरन्तरं उन्नतिपथे गच्छन्ति। प्रकृति: अपि ईश्वरस्य अनुशासने तिष्ठति। य: नर: पूर्णतया अनुशासनं पालयति स: स्वजीवने सदा सफल: भवति। अत: अनुशासनस्य पालनं जीवने बहु आवश्यकं भवति।